শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী কৃষ্ণব্রহ্মতন্ত্রপরকালমহাদেশিক কৃতিষু

# ॥ শ্রী পঞ্চাযুধস্তুতিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী পঞ্চাযুধস্তুতিঃ ॥

প্রথিমহিতং প্রোদ্যদ্ধনমিত্রদ্যোতং মহাযুধং হৃদযে।
সারসনাভং কলযে সুদর্শনং সাধুচক্ররাজন্তম্॥ **1** ॥

হরিমুখমরুদভিসংস্তৱভৱনিনদধ্ৱস্তদনুতনুজদর্পঃ।
পঞ্চজনাধারোঽৱ্যাদ্ভগৱাত্রাজন্মহাদরঃ কোঽপি॥ **2** ॥

রুচিরাঙ্গদাংভুজঙ্গমপুঙ্গৱগিরিপতিকরগ্রহোল্লসিতাম্।
ৱিধুতালসদনুজাতাং সাধুশ্রিযমাশ্রযে শরণম্॥ **3** ॥

সন্নন্দকমসিতোজ্জ্ৱলমোজঃ শ্রীমৎসরূপধেযাঙ্গম্।
ধ্যাযামো বলিদৈত্যধ্ৱংসনদক্ষিণমহাশযাকলিতম্॥ **4** ॥

সমুপনতেষু প্রৱণং ৱিধূনিতজ্যানিঘৃষ্টপরকোটি।
ৱস্তুমহাশার্ঙ্গং চিরমস্তু মম শ্রেযসে কিমপি॥ **5** ॥

অনুদিনকৃতিরচনকৃতী শ্রীকৃষ্ণব্রহ্মতন্ত্রপরকালঃ।
ইষ্টার্থদাং যতিরিমাং শ্লিষ্টাং পঞ্চাযুধীযনুতিমতনোৎ॥ **6** ॥

॥ ইতি শ্রী পঞ্চাযুধস্তুতিঃ সমাপ্তা ॥